1042

॥अथकुंडमार्तंडप्रारंभः॥१म॥
॥पत्र१२॥

ROYAL ASIATIC SOCIETY OF BENGAL

॥श्रीगणेशायनमः॥मधुकरदृतगंडंभालमालीदुरवंडंविलसितकरदंडंविघ्नना
शैकचंडं॥वितरितबुधपंडंसंलसत्स्थूलपिंडंविदलितरिपुकांडंनौमितंवक्रतुं
डं॥१॥हृदयकमलमध्येकृष्णपादारविंदंनिजगुरुपदपद्मंसंभ्रमात्साधुभ
क्त्या॥अभिमतफलदंसंचिंत्यकुंडादिसिध्येविदधइहनवीनंकुंडमार्तंडसंज्ञं॥२॥
स्वीयावध्यास्तोदयश्चारुपादैर्महध्वांतस्तोमनाशप्रचंडः॥नित्यंज्ञानारोग्यदः
सवितःसन्मार्तंडोयंमंगलंवस्तनोतु॥३॥गणतानभिहतनवकुंडमंडपक्रमसाध
नोद्यतविपश्चितांमुदे॥रचितोधियाकविबुधगुणप्रियाःपरिमृश्यसाधुकिल ७

ह्रस्वः ह्रस्वः
शोधयंतुतं॥४॥चेत्खैर्वैःप्रपदोच्छ्रितःसमपदःप्रांशुर्नरोप्यूर्ध्वरोर्यस्तस्येषुलवः
करोजिनैलवस्तस्यांगुलंवेयवः॥स्यात्तस्येभलवस्तुतद्दसुलवोयूकाचलिक्षात
थावालाग्ररथरेणुरत्रगदितास्तत्तद्गुणाःक्रमात्॥५॥रत्निरित्थमुदितःकृत
मुष्टिर्हस्तएवविबुधैर्विकनिष्ठः॥स्यादरत्निरितिसूरिभिरुक्ताकुंडमंडपविधौ
परिभाषा॥६॥श्वेतारक्तापीतवर्णाचरुक्षास्रपरिक्तानासवामोदयुक्ता॥भूमिः
स्वादुःस्यात्कटुस्तिक्तकापिकषायावैविप्रतोयागयोग्या॥७॥कुंडार्थंपृथ्वीप
रिशोधहेतवेप्रष्टुर्मुखाद्यःप्रथमंसुटीभवेत्॥वर्गादिवर्णःकिलतद्विशिस्मृतं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

दिक्साधनयोग्यं द्विजसमीपं

पातःकाले २

शल्यंमुनींद्रैर्हपयेस्कमध्यतः॥८॥बुध्वैवंधरणीसमांमुकुरवत्कृत्वाद्विजेंद्रैःपु
रापुण्याहंक्रमठंधरांफणिपतिंसंपूज्यपुष्पादिभिः॥संशुद्धेदिवसेतिथौचभ
युजोर्विप्रोपकंठेप्रगेप्राचीसाधनमिष्टमंडपकृतेकुर्याद्विपश्चिन्मुदा॥९॥दिवा
करमितांगुलप्रमितकर्कटेनप्रगेगुणेनभुविवावरंविलिखमंडलंयाज्ञिक॥नवां
गुलमितंनरंखदिरकंकदंतोद्भवंयथोक्तलक्षणंललितमत्रसंस्थापय॥१०॥
शरक्षेमांगुलाभौधिसंख्याभिरत्रसमस्पृष्टशीर्षशलाकोत्तमाभिः॥विशेछंकुभा
यत्रयस्माच्चयायात्क्रमात्तत्पयोनाथसुत्रामकाष्ठे॥११॥वृषभकर्कसिंगालिषु २
वरुण इंद्र दिशो

११।१२।९।५।६।७।

यूकयाद्विमितयाघटकेसरिभत्रये॥तरलिरेतिदिशंहरिदिक्ततोधनुषिनोमिथुने
चविचाल्यते॥१२॥यूकालकंचालनमुक्तमत्रस्थिरंसमंयद्विसंक्रमेषु॥स्वल्पांतर
त्वान्नकृतंमयान्यन्नातोभवेत्तत्किलदूषणाय॥१३॥द्यूनस्वोर्ध्वसमन्वितोन्नमगु
णंमध्यंकपाशान्वितंप्राचीपश्चिमरांकुयुग्मनिहितंविद्वन्कुरुत्वंमुदा॥धृत्वाक
र्षयसूत्रखंडविलसच्चिद्रंकरेणोत्तरांयामीतद्यमचंद्रयोरविरतंकाष्ठेभवेतां
स्फुटे॥१४॥मध्यछिद्रयुतांनवीननलिकांसत्सूक्ष्मरंध्रान्वितांरंध्रप्रोतगुणा
ग्रयुग्मविलसल्लंबांनिशायांकिल॥कृत्वासंस्थितएवयत्रनलिकारंध्रस्थदृष्ट्या

पुरःप्राचीपश्चिमसाधनंश्रवणतःपुष्याच्चकुर्यात्सुधीः॥१५॥दृष्ट्वासाचिविलोक
येद्विनलिकामूलेक्यरंध्रान्मरुत्स्रोष्ट्रस्वोदयनेनलिह्ययमिलत्तिर्यक्खयष्टांत
रात्॥लंबायंप्रपतेत्ततश्चनलिकामूलेक्यमध्यांकतःपश्चात्स्वःपुरुहूतपौष्णि
हरितोतल्लक्ष्मयुग्मेक्रमात्॥१६॥स्वंदिगंतकरांकुगतंद्विपाद्रांस्वांतलक्ष्म
निजविस्तृतितुल्यमस्रे॥धृत्वाप्रकर्षयपुमन्नितिवेदकोणेस्याकुंडमंडपविधौ
चतुरस्रभूमिः॥१७॥धरांकुरुकरेणवाकरदलेनचास्रतांजनाश्रयसतेरुतावु
परमंडपश्चेत्तदा॥जनाश्रयमितांधरांमरविधिज्ञमध्येभितोविहायकुरुतान्यरा ३

नयनसुंदरान्मंडपान्॥१८॥अधमोदिग१० र्क१२करमंडपःकृतोनरणी१२द्र१४
हस्तनुलितश्चमध्यमः॥धृति१८भूप१६हस्तविततोमहाभवेन्नरव२०हस्तमंडप
वरस्तलार्पणे॥१९॥भूप१६स्मर्य१२दराहस्तमंडपोद्विजनोबुधैर्निगदितोथवावरः॥
नरव२० अधमान्वयस्यवसु८हस्तमंडपःकरिद्रुरो२८गुरुतरःस्मृतःपरैः॥२०॥द्वाश्वे
नुष्कमुदितंदिगंतराहस्तयुग्ममितमग्र्यमध्ययोः॥वर्धितंगज८युगांश४गुलैस्तते
वेदिकात्रिलवतःकरोन्नता॥२१॥गदिताधममध्ययोस्तलायांत्रिरपहस्तान्नवि१
हस्तसंमितोच्चा॥प्रवरेद्रि७करागिरीशभागेग्रहवेदीरुचिरास्तृतिस्त्रिवप्रा॥२२॥

लोकाधारसमत्रिभागकचतुश्चिद्रेषु पूर्वापरंयाम्योदक्कगुणंदिवाकैरसमस्तंभान्
सच्चंडांबुधः॥अंतस्तंभचतुष्टयंगजदशांशंदद्याच्छरांशंपक्षितावेवंपंचदशांशकं
तोकिलनृपेद्वस्तंभाःकरांशोरपाकृ॥२३॥निधेयाःस्तंभानामुपरितनचंडासुवलि
काःकृतोवाकर्णेतर्बहिरपिसमस्ताःसुसरलाः॥प्रतीचीपूर्वस्थायमशशिहरित्स्थाश्च
वलिकाविधेयाःकोणस्थामरविटपिजासाधुमतिना॥२४॥मध्यत्रिभागशिखरंरु
चिरंविधायप्रछादयेद्दृजुकटैःक्रमुकैःसुवंशैः॥सद्वारवर्जितजनाश्रयमेतमत्रस्त
म्भान्विचित्रवसनैरपिमंडपज्ञः॥२५॥शरपरमध्मुनि७हस्तेमंडपान्तोरणानिबहि ४

रपिकरतःस्युर्यज्ञवृक्षोद्भवानि॥अधमसमवरैस्यादायतिश्चद्विहस्ताच्चरणेदलाद्
विवृध्यासांगयज्ञप्रसिध्ये॥२६॥वटोदुंबराश्वत्थवृक्षाधिराजैर्विधेयानितानींद्रदिक्त
क्रमेण॥चलेपत्रयज्ञांगपंकीरुपंद्विस्त्विमान्येककेनेवमेषामभावे॥२७॥स्तंभाधेनि
तफलंकुरुषतिर्यक्तनछीर्षनवस्थिशि११विश्व१३पैर्वकीलान्॥आत्मीयाब्धिलवैते
तांस्त्रिशूलरूपांस्तद्रोपोद्धिगुणं३युगांश४गुलानिन्नोवे॥२८॥दश१०द्वादशें१२द्रों१४गु
लाःकाष्ठकीलास्त्रि३वेदा४क्षपतुल्यांगुलंतत्प्ररोपं॥पयोजारिकोमोदकीपद्मचिह्नाभ
वेयूरमाकांतयज्ञेक्रतुज्ञ॥२९॥फलालिभानितछदोल्लसत्कदल्यधिष्ठितंप्रसन्नगुछ

संयुतंविधेहिमंडपंश्रिये॥सुवर्णमौक्तिकोज्वलद्वितानरंजितांतरंप्रबद्धदर्पणस्फुर
न्मनोज्ञपंचचामरं॥३०॥सुपीतशोणमेचकान्विधायनीलपांडुरान्सितावदातपांडुरा
न्ध्वजान्द्विहस्तविस्तृतान्॥दिगीशवाहनान्वितानरवचंद्र१० हस्तवंशकेएषलक्ष५हस्त
संमितान्निधेहिपूर्वतःक्रमात्॥३१॥हरित्स्वामि पत्रास्त्रवर्णःपताकास्तताहस्त
तःसप्तहस्तेश्वदीर्घाः॥विचित्रंध्वजंदिक्करंदिक्करोच्चेत्रि हस्तायतंप्रोतघंटंसुवंशे॥
॥३२॥विशदानवमीशुभापताकापुरुहूतेशदिगंतरानिधेया॥तनुयादपिपूर्वतःप
ताकाःपरिसंस्थांविधिवन्मुदाविपश्चित्॥३३॥वेदास्रंयोनिकुंडंशशिदलममलंव ५

निर्ऋति. पश्चिम. वायव्य. उत्तर. ईशानी. पूर्वेशानयोर्मध्ये

द्भिकोणंसुवृत्तंषट्कोणंपद्मकुंडंगजभुजमितःपूर्वतःस्युःक्रमेण॥वृत्तंवावेदको
णंसुरपतिशिवयोर्मध्यभागेचवेद्यास्त्रिंशद्भि३०श्चांगुलैर्वारविभि१२रिहसमस्ता
निकुंडानियज्ञे॥३४॥हरिंछंभुकुंडेभवेत्संचकुंडीयदैकंतदापोशिचंद्रेशदिक्षु॥क्रतु
ज्ञेनकार्यस्वबुध्यासमस्तंविदित्वामनोवांछितंकर्तुरेवा॥३५॥वेदास्रंवृत्तकुंडंशशिव
लमनलेस्त्रिद्विजान्मुख्यमुक्तंसर्वेषांवेदकोणंमखविधिनिपुणैःप्राक्तनैर्वानिरुक्तं॥
आहुर्वृत्तंहिचान्येक्षितिसुरसुखतोयोषितांयज्ञविद्भिःप्रोक्तंसद्योनिकुंडंसकलमु
निमतंसर्वकार्यार्थसिध्ये॥३६॥श्रीसिद्धिश्चतुरस्रकेसुतसुखंयोनौदलेमंगलंच्यस्र

शत्रुविनाशनंसुखचयोरत्नेंगकोणेकृतो॥स्याद्रिष्टापहतिःसुदृष्टिरमलेपद्मेष्टकोणे
शुभंप्राचीशंभुदिगंतगेजयधनंरत्नेब्धिकोणेपिवा॥३७॥दिग्निः१०वैभै८स्तुकोटौ
नृप१ध्रुकरमपरेषट्करंपंक्तिलक्षेलक्षेस्याद्वेर्हस्तसदयुतहवनेहस्तयुग्मंसहस्रे॥
हस्तंचारत्निकुंडंशतमितहवनेरत्निकुंडंशतार्धंलक्षाद्धस्तेकवृध्यादशैमुदितंपंक्तिं करं ५
लक्षांतमन्येः॥३८॥अर्धकोटौकुंडलक्षेहोमेखदृग्लक्षलक्षार्धयोःप्राक्तनैःसूरिभिः॥
शैलेबाणाब्धिषट्वह्निहस्तोन्मितंकुंडमत्रोदितंसम्मतंतोक्रमात्॥३९॥श्रंगुल्योवे
दपक्षाश्व४निगमहुतभुजः२४क्ष्माऋताश्व१अष्टवेदा४८रामाक्षा५२नागबाणा५८ ६



षट्रसाः६ हस्तनः
दहनरसमिताः६३शैलेषट्६७पक्षशैलाः७२वेदास्त्रेबाणशैलाः७५ शयतद्दहयवा
व्योम॰शून्यं॰शराः५खं॰पंचांपगंद्वीर४मद्रि७र्गगन॰नग७मिताःपंक्तिहस्तांतमु
क्ताः॥४०॥त्रयाणांकुंडानांयमदिशिबुधैर्योनिरुदितासदासोम्याग्नेर्द्व्याद्यतरशैर
कुंडानिसुमते॥प्रतीच्यांतयोनिर्भवतिमुखमैंद्र्यांदिशिमखेनकोणेयोनिःस्याद्विज
वरनयोनाविषमपि॥४१॥योभूपैहस्तावधिहस्ततःस्याद्व्यासःसहस्तात्मकएवक
ल्यः॥अत्रांगुलंपूर्वमतोयवःस्याद्यूकाततःस्यात्क्रमतोंकसंज्ञा॥४२॥सद्व्यासंद्वि
गुणंद्विपाशसहितंतुर्यांशचिह्नान्वितंप्राचीपश्चिमशंकुगंसुमतिनाकृत्वाततःको

LIBRARY OF THE ROYAL ASIATIC BRANCH OF THE

णयोः॥धृत्वानत्करतः शशांकहरितंव्यारूष्यचिद्भंततोयामीवांछितसिद्धिदंश्रुतिभुजंकुंडंभवेदिंद्रदिक्॥४३॥यूकायुग्मेसमेतभ्र१यवयुतैः पंचांगुलैःक्षेत्रतःसत्रंवर्धयचंद्रखंडयुगलंकर्णाग्रिमानाल्लिख॥पश्चात्साधुगुणद्वयेनपुरतोंकाद्योनिकुंडंस्फुटंसुत्रप्रदमुल्लसच्छवियुतंस्याद्वह्निदिक्संस्थितं॥४४॥नंदक्ष्मा१गुलकैर्धरा१यवधरा१यूकेषुपलिक्षान्वितैर्हत्वार्धंगुणतोथवाभवतियत्कर्कीटकेनद्विज॥प्रत्यंचांकुरुतत्पुरःशशिदलंमांगल्यपुष्टिप्रदंधर्माश्रास्थितमुल्लसच्छवियुतंश्रीसप्ततंतोमतं॥४५॥स्वाभीष्टकेदारपुरोगजांगुलंश्रोण्यश्वसंवर्ध ७

रसांद्गुलंगुणं॥श्रोण्यंततः सत्त्रयुगंपुरोंकगंदेहित्रिकोणंरिपुनाशदंभवेत्॥४६॥विश्वांगुलैर्वेदयवद्वियूकापंचान्वितैःसत्कुरुवृत्तकुंडं॥शांतिप्रदंविप्रनृपादियोग्यंप्रोक्तंमुनींद्रैःसलिलेशदिक्स्थं॥४७॥वृत्तेष्टदृशभि१८र्भुवा१मुनि७भुजै२रिंदिशःषड्गुणान्तुल्यान्वेविधृतेतदुन्मितगुणेदत्वैककंप्रोज्झ्यवा॥तान्संध्यंशाभुजान्वृतंचसकलंसंमार्जयेद्वह्नवेत्सम्यग्वोत्कलिकंषडस्त्रमनिलाशास्थंमतिछेदकं॥४८॥शक्रै१४रश्वै७र्लोचनाभ्यां२विदध्याद्वृत्तंतस्मिन्त्रिचक्रषट्कंसमानं॥दद्याद्वाहूनषट्समानंचदिक्कोवाताशास्थंस्यात्षडस्त्रंरिपुघ्नं॥४९॥स्याद्रामै३रथमंद्वि

नीयमरिभिरुक्तातृतीयकंभानुभिर्१२रात्रैः१४सप्तभिर्७रग्निभिर्३श्चरमंवृत्तंनृपं[illegible]तृतीयसंयुक्
कांकितं॥धृत्वादिग्विदिशोःप्रारंभतरमपाक्कर्कटकंचोर्ध्वतःपत्राण्यष्टकुरुक्षपाप
तिहरिकुंडंकजंवृष्टिदं॥५०॥स्वायामेच्चाकर्णिकापूर्ववृत्तेयुग्मवृत्तेकेसराःषोडशा
स्युः॥मध्येहित्वाकर्णिकांसकुरुत्वेपद्मंकुंडंसाधुसर्वंरवनित्वा॥५१॥धृत्या१८पंचभिप
रिंदुना१विरचितेवृत्तेविदध्यादपागिंद्राग्र्यंतरचिह्नतोवसु८गुणान्तुल्यान्शरांप
कांतरे॥तत्संध्यष्टगुणान्करेणचवृतिंसंमृज्यसम्यग्भवेदष्टास्र्युत्कलिकंत्रिलो
चनहरिश्चक्षुःप्रियारोग्यदं॥५२॥शक्रे१४र्हाप्यां२वह्निभिर्३वृत्तमस्मिन्दिग्भिः१०यौ ८

लेश्रब्धि४रग्नीद्रमध्यात्॥दद्यात्तुल्यान्नागबाहून्गदघ्नंकुंडंनागात्संभवेछंभुदि
क्स्थं॥५३॥बाणेंदु१५प्रमितांगुलैःकृत४यवैर्बाणे५समासादितेवृत्तेषोदशभि१६
र्द्वयेनचनिगमे४र्दहीषु५संख्यान्भुजान्॥तुल्यान्तुल्यशरास्त्रिशाऋहरितःकुंडंभ
वेन्मार्जनाद्वृत्तस्यत्वभिचारशांतिकविधौसद्यश्चमत्स्वरं॥५४॥आरुत्येरसुभिप
रिंदुना१श्रुति४मितैर्वृत्तेत्रवैकांतरादुत्सेधांगुलभद्रमार्गणांकितइतोदत्वेषु५संख्या
न्भुजान्॥प्राच्यामुत्कलिकंशरास्त्रिवलयंसंमृज्यकुंडंकुरुत्वंरम्यंत्वभिचारकर्मशा
मनंपूर्वज्ञविद्वत्स्मृतं॥५५॥इंद्रो१४गुलैःश्रुति४यवैर्वलयंचतस्मिन्रव्यंगुलै१२र्यु

गश्ययवैःशरपंसंख्यकाभिः॥युक्ताभिरिंद्रहरितोद्भिश्भुजान्विधेर्हिस्याद्भूतदोष
ग्रामनेसमंसप्तकोणं॥५६॥नृपैः१६सागरै४र्मार्गणै५र्वन्हिमिंद्रै१४र्गुणैरंकितं
सप्तजीवाःपुरोक्तात्॥निधेर्हिवमेकांतराद्भूतशांत्यैभवेदुत्कलंतुल्यसप्तास्त्रिकुंडं
॥५७॥समेरवलंखातमुक्तांतियद्वैक्षेत्रेणतुल्यंत्वपरंविमेरवलं॥वदंतिचंद्रांगुलतु
ल्यकंठंपक्षांगुलंवामरंध्रमार्गकोविदाः॥५८॥खातार्थंखननेमेदिनीमधरतःप्राणै
र्दृ१५तुल्यांगुलैः कंठार्थंविमितंस्यजांगुलभुवंरंध्रांगुलैश्चोपरि॥श्रुत्यग्निद्वि
मितांगुलैस्तुवितताःस्तुंगास्तथामेखलास्तिस्रःस्युर्गुणाःलोचनक्षितिमितास्ता

श्रेष्ठमध्याधमाः॥५९॥उच्चायांकरंमितांगुलैस्तदपरान्नैलेर्भुवा१पंचभिपस्ता
तरंयेषुभिपरंध्रिभिस्त्रिभिरथेंन्दावद्रिभिः३सागरैः४॥शैलैर्भस्तच्चरमाभुवा१
रसद्रंमितैर्वेदैर्४स्तथासागरै४रद्रिभिः४राजुभिर्द्रंध्रिभिस्त्रभिस्तथ रसैर्दश्चैमैर्थावै१२ः
क्रमात्॥६०॥पूर्णेनाब्धिभिर्४रद्रिभिः७भुभरतिःसाकर्णिकास्यान्ततःक्षित्या१
जेन१रसैर्द्वितीयसुरतोस्युःकेसराःषोडशा॥चंद्रैर्१णांगद्रंमितैःशरैःपरुतरतो
कुर्वीतपर्णान्यसोनाभिःपद्मनिभोंबुजेनकथितःकुंडानुरूपोथवा॥६१॥यवाभ्यां
पंचयूकाभिपर्मितसूत्रेणयाज्ञिकाःपद्मनाभिदलाग्राणिरम्याणिकुरुसर्वतः॥६२॥

श्वत्थच्छदसंनिभांतरवटाधोविस्तृतोर्ध्वस्थिताधेंदुद्वंद्वयुताजिनांशपरिधि
र्विषकृतयेवोन्नता॥ निम्नकुंडमिताजिनांशसुरवतोव्यासार्धदीर्घा मतामूलाछि
द्रयुतात्मनालरुचिरायानिर्गुणाश्शायता॥६३॥ द्व्यंगुलोच्छ्रासमृतानाभिर्विस्तृता
चतुरंगुलैः॥ यदेकामेखलाकार्यषडंगुलततोनता॥६४॥ चेदर्क१२मितांगुलो
न्नततताक्रां हियोनिस्तदादीर्घाबाणधरा१५गुलैः सुविनतापूर्णेंदु१०तुल्यांगु
लैः॥ तिस्रः स्युः श्रुति४संमितांगुलनतास्तुंगाश्चसर्वाबुधैस्ताः कुंडाकृतयोधरा१
गुलमिताकंठाह्वहिःशंसिताः॥६५॥ अथवामेखलायुग्ममेखलात्रितयंपुनः॥ १०

मेखलापंचकं प्रोक्तमल्पमध्योत्तमंक्रमात्॥६६॥ कनकरुचिरकांत्यासन्मदास्ते
डिलंबाकरमितचतुरस्रंकूर्मपृष्ठोन्नतंचा॥ बुधकुरुकृतभतुल्यैरंगुलैरुन्नतंवांगुल
मितमपिरम्यंस्वल्पहोमेमुदावं॥६७॥ श्रीमज्जुन्नरपत्तनेशिवगिरे रासन्नसंस्थे
सदायः श्रीकुसुरतोगदाधरदैवज्ञनाथप्रपूज्योभवत्॥ तत्सूनुर्गणकाग्रणीर्विम
लधीर्गोविंदसंज्ञः कृतीलीलावानकरोदमुंसुसरलंग्रंथंविपश्चिन्मुदे॥६८॥ ॥
गुणशशिरसचंद्रैः१६१३संमितेशाककालेसहसिबहुलपक्षेकामतिथ्यांशशां
के॥ विबुधगुरुकवीनांहर्षदोयंस्फुटार्थः समगमदतिपूर्तिंकुंडमार्तंडसंज्ञः॥६९॥

येदर्भगर्भाग्रधियोहितेषांग्रंथाशयःसूक्ष्मतरोविभाति॥येमुग्धमुख्या
भुविसंतितेषांस्यादिंद्रवज्त्राहतपक्ष तुल्यः॥७०॥नवरसमितवृत्तैर्गुंफितं
संभ्रमाद्यःपठतिभुविभवेत्सज्ञानवान्विश्ववंद्यः॥सुतधनसुखसंपत्काम
पूर्णोपकारीबुधकुलकमलेंदुःकुंडमार्तंडमेनं॥७१॥ ॥इतिश्रीमज्जोविंद
दैवज्ञविरचितःकुंडमार्तंडःसमाप्तिमगमत्॥ ॥कृत्वांकांगधृतांध
गुत्रादिकभुजे वेदास्त्रिचेत्तद्गुणंमध्यंसंपरिवर्ध्यपक्षरकुकृतैःपर्वादि
क्षिःपूर्वतः॥वृत्तार्धंकुरुकर्णपादमितितःपश्चाच्चताभ्यांपुन र्द्वैस्त्रैचपु



हस्तास्तेत्रफलंद्विघन्मुनिशराः५७६पक्षेषुचंद्रेदवो११५२नागाश्चाद्रिधराः७२८
रुनाभ्रहुतभुक्पक्षाः२३०४खनागेभदृक्॥२८८०॥षड्नागाब्धिगुणाः३४५६द्विव
सांकगेसुघटितंकुंडोत्तमांगंभवेत्॥७१॥ ॥अष्टाष्टदृग्१०दिग्१०मनु१४र्नृपा
ख्य१६ध्यये १८र्नरवे२०श्चाकृति२१वेदपक्षैः२४॥जयाद्रयातोविजयाख्यभद्रास्यु
र्विश्वस्पःसुरूपोध्रुवश्च॥२॥पुष्टिवर्धनानामाख्यःसुधन्वांगस्तथैवच॥नंदनश्चेति
नामानिमंडपानांनवक्रमात्॥३॥यवादूनंप्रमाणंतुमंडपादौनचिंतयेत्॥सूत्रस्याधो
विलीयंतेलिक्षायूकादयःशतं॥४॥ ॥इतिकुंडमार्तंडःसमाप्तः॥ ॥श्रीरामचंद्रप्रसन्न
शके१७०४शुभकृन्नामसंवत्सरेवैशाखशुक्लचतुर्थ्यांसमाप्तोयं ग्रंथः॥इदंपुस्तकंपु
ण्यस्तंभस्थितथाल्युपनामकनागेशभट्टात्मजशेषभट्टस्य॥ ॥श्रीः॥ ॥ ॥
क्षिरवज्वलं४०३२नागाभ्रनष्टसागराः४६०८स्तोयेभेंदुशराः५१८४खषण्मु
निशराः५७६०स्यात्संक्षिप्तस्तोदधिः॥१॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

कुं०मा०
१२

॥इतिकुंडमार्तंडःसमाप्तः॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY